दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-89 | 1 | जनवरी 28 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ हेमन्तऋतुः
सूर्यदक्षिणायनम् माघ कृष्णपक्ष चतुर्दशी
तिथिः माघ 15 प्रविष्ठांशः मङ्गलमयः भवेत्

2 मध्यप्रदेशस्य महूस्थाने भाजपायाः उपरि मुख्यमन्त्रिणः वाक्प्रहारः,काङ्ग्रेसनेतृभिः दासतायाः श्रृङ्खलाः भग्नाः

3 सूरजहत्याप्रकरणे जैदीसहितम् अष्टपुलिसकर्मचारिभ्यः आजीवनकारावासः

3 श्रीरामायणकथा, उत्तरकाण्डम्!(सप्तपञ्चाशत्तमः सर्गः)नैमिषारण्यं प्रति रामस्य गमनम्।(द्वितीयः खण्डः)

# यू.ए.ई देशस्य त्रिद्विवसीयायां यात्रायामस्ति विदेशमंत्री एस. जयशंकरः

विदेशमंत्री एस. जयशंकरः यू.ए.ई देशस्य त्रिद्विवसीयायां यात्रायामस्ति। अस्यां यात्रावधौ श्री जयशंकरः यू.ए.ई. देशस्य शीर्षनेतृभिः साकं द्वयोः देशयोः पारस्परिक सहभागितायाः पुनरीक्षणं करिष्यति, अथ द्विपक्षीय संबंधान् वर्धयितुम् नवीनांवसराणां कृते वार्ता विधास्यन्ति। एकस्मिन् वक्तव्ये विदेश मंत्रालयेण प्रख्यापितम् यत् एषा यात्रा द्वयोः देशयोः मध्ये सकल-सामरिक सहभागितां उन्नयनाय अवसरं प्रदास्यति अथ संबंधेभ्य नवीनं संवेगमपि प्रदास्यति

## बेलारूस देशस्य निवर्तमान राष्ट्रपति अलेक्जेडर लुकाशेंको राष्ट्रपति पदाय निर्वाचनम् विजितवान्

बेलारूस देशस्य निवर्तमान राष्ट्रपति अलेक्जेडर लुकाशेंको राष्ट्रपति पदाय निर्वाचनम् विजितवान् बेलारूस देशस्य केन्द्रिय-निर्वाचनायोगानुसारेण श्री लुकाशेंको षडशीति दशमलव अष् द्वि प्रतिशतं मतम् प्राप्तवान् । बेलारूसदेशे राष्ट्रपति पदस्य कार्यकालं पञ्चवर्षात्मकं भवति ।

## सम्पत्ति-क्रयणसम्बद्धेन भ्रष्टाचारस्य आरोपेण अपराध- अन्वेषण- विभागेन श्रीलङ्कादेशे पूर्वराष्ट्रपतेः महिन्द्रा राजपक्षस्य पुत्रः गृहीतः

श्रीलङ्कादेशे पूर्वराष्ट्रपतेः महिन्द्रा राजपक्षस्य पुत्रः योशिता राजपक्षः गतप्रातः कोलम्बो म्याजिस्ट्रेट इति न्यायालयात् कारावासात् आंशिकीं मुक्तिम् अलभत् । सः सम्पत्ति-क्रयणसम्बद्धेन भ्रष्टाचारस्य आरोपेण अपराध- अन्वेषण-विभागेन गृहीतः आसीत् । कोलम्बो नगरस्य समीपे रत्मलाना-नगरे भू-अधिग्रहणस्य अन्वेषणस्य भागरूपेण अधिकारिणः पूर्व-नौसेनायाः अधिकारिणं शनिवासरे बेलियाट्टा नगरे निगडितवन्तः आसन् ।

# नागरिकसंहिता प्रवर्तकं देशस्य प्रथमं राज्यमभवत् उत्तराखण्डराज्यम्



हिमसंस्कृतवार्ताः। उत्तराखण्डराज्यम् अनुसूचित-जनजातीयान् जनानतिरिच्य सर्वेभ्यः नागरिकेभ्यः विवाह-विवाहोच्छेद-उत्तराधिकार-त्यादि विधिषु समान नागरिक संहितायाः प्रवर्तकं प्रथमराज्यम् अजायत्। अस्य विधिनियमस्य लक्ष्यमस्ति सर्वेभ्यः नागरिकेभ्यः समानाधिकाराणि सुनिश्चयता व्यक्तिगतनागरिक विधीनां मानकीकरणमस्ति। राज्यमन्त्रिमण्डलेन सद्यः एव यूसीसी इत्यस्य कार्यान्वयनाय नियम-विनियमाः स्वीकृताः आसन्। यूसीसी इत्यन्तर्गतं राज्ये धर्मं विनैव कारणं मत्वा अनुसूचित जनजातीयान् जनानतिरीच्य नागरिकेभ्यः विवाहादीनां वैधिक्याः साम्यतायाः दानमस्ति। लिव-इन रिलेशनशिप इत्याख्यायै स्वेच्छाचारितायै पंजीकरणम् अनिवार्यं भविष्यति ।

## 'उत्कर्ष ओडिशाः मेक्-इन्-ओडिशा-कान्क्लेव्' इत्यस्य उद्घाटनं करिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य भुवनेश्वरस्य जनता-मैदान् इत्यत्र 'उत्कर्ष ओडिशाः मेक्-इन्-ओडिशा-कान्क्लेव्' इत्यस्य उद्घाटनं करिष्यति। अस्मिन् द्विवार्षिकसम्मेलने विंशतिः पारदेशीयदेशैः सह सार्धसप्तसहस्राधिकाः प्रतिनिधयः भागं ग्रहीष्यन्ति। आयोजनमिदम् ओडिशा-राज्यस्य अद्यावधिसञ्जातेषु बृहत्तमेषु वाणिज्यसम्मेलनेषु अन्यतमम् अस्ति। सम्मेलनमिदम् ऐतिहासिकम् इति सिद्धं भविष्यति तथा च सुदृढायाः जीवन्ततायाश्च अर्थव्यवस्थायाः आधारं स्थापयिष्यति । सहैव हि कार्यक्रमोऽयं च कृषकाणां आदिवासिनां च कृते विशालान् अवसरान् कल्पयिष्यति इति मन्यते। सम्मेलनावसरे शताधिकेषु एम्. ओ. यू. इत्येतेषु हस्ताक्षराणि करिष्यन्ते, येषु सार्धत्रि-लक्षजनानां कृते वृत्ति-सृजनस्य सम्भावना वर्तते ।

## एनसीसी संस्था सर्वदा भारतस्य युवान् राष्ट्रनिर्माणार्थं प्रेरयति



हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, राष्ट्रिय-कैडेकाईस (एन्. सि. सि.) इति संस्था सर्वदा भारतस्य युवान् राष्ट्रनिर्माणार्थं प्रेरयति, तान् अनुशासनस्य महत्त्वं च शिक्षयति। श्री मोदी नवदेहली-नगरस्य करियप्पा परेड्-ग्रौण्ड् इत्यत्र वार्षिक-राष्ट्रिय-कैडे काईस (एन्. सि. सि.) इत्यस्य प्रधानमन्त्री सभाम् सम्बोधयन् आसीत्। श्री मोदीः अवदत् यत् देशस्य युवकाः 21 शताब्द्यां भारतस्य विश्वस्य च विकासं निर्धारयन्तीति। सः तान् वैश्विक- कल्याणस्य शक्तिः इति उक्तवान् तथा च तान् विना विश्वस्य भविष्यस्य कल्पना कर्तुं न शक्यते इति उक्तवान्।

## अमरीकादेशेन अन्येभ्यः राष्ट्रेभ्यः दीयमानाः सहायताः पुनरीक्षणाय आदेशो दत्तः

हिमसंस्कृतवार्ताः। अमरीकादेशेन सर्वविधासु पारदेशिक सहायतासु अवरोधो घोषयता अन्येभ्यः राष्ट्रेभ्यः दीयमानाः सहायताः पुनरीक्षणाय आदेशो दत्तः। संयुक्तराज्यामेरिकादेशः सर्वाण्यपि विदेशीयसहाय्यानि अस्थगयत् । अन्यदेशान् प्रति अमेरिकीयवित्तीयसहाय्यस्य समीक्षां कर्तुम् अपि अयं देशः आदिशत्, येन सुनिश्चितं भविष्यति यत् ते अमेरिका-प्रथम इति कार्यसूच्यान्तर्गतं विदेशनीतेः पर्याप्ततया अनुरूपाः सन्ति नवेति । अस्मिन् विषये राष्ट्रपतिना डोनाल्ड् ट्रम्प् इत्यनेन कार्यकारी आदेशे हस्ताक्षरनन्तम् आदेशोदयं निस्सारितः । विदेशविभागस्य प्रवक्ता मी ब्रूस् इत्येषा अवदत् यत् राष्ट्रपतिः ट्रम्पः स्पष्टतया उक्तवान् यत् संयुक्तराज्य अमेरिकादेशः प्रत्यावर्तनस्य संभावनां विना अन्धतया धनस्य निर्गमनं न करिष्यति इ

## सुभाषितम्

**यस्य नास्ति स्वयं प्रज्ञा,
शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य,
दर्पणः किं करिष्यति॥**

हिन्द्यर्थः-जिस प्रकार अन्धे व्यक्ति के लिए दर्पण कुछ भी नहीं कर सकता उसी प्रकार विवेक से हीन व्यक्ति के लिए शास्त्र भी कुछ नहीं कर सकता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## त्रिवेणी संगमे पवित्रजले स्नानं कृतवान् गृहमन्त्री अमितशाहः

गृहमन्त्री अमितशाहः गतदिने उत्तरप्रदेशस्य प्रयागराजस्य महाकुम्भे गंगा, यमुना, सरस्वत्याश्च त्रिवेणी संगमे पवित्रजले स्नानं कृतवान्। मुख्यमन्त्री योगी आदित्यनाथः, योगगुरुः रामदेवसहितं विभिन्नमठमन्दिरानाम् अखाडानां च अनेकाः संतजनाः गृहमन्त्रिणा साकं पवित्रं स्नानं कृतवन्तः।

श्री शाहः अपि विशेषपूजां कृत्वा संगमे-आरतीकार्यक्रमे भागं गृहीतवान् भ्रमणकाले श्री शाहः आचार्यमहामण्डलेश्वर अवधेशानन्द, महन्तहरिगिरी, महन्तप्रेमगिरी इत्दादिभिः सह महाकुम्भस्य व्यवस्थायाः विषये विशेषचर्चाम् अपि अकरोत्। अल्पसंख्यकमन्त्री किरेन् रिजिजुः अपि संगमे स्नानं कृतवान्। प्रयागराजे श्री रिजिजु प्रधानमंत्री जनविकासकार्यक्रमस्य समीक्षामकरोत्।

# मध्यप्रदेशस्य महूस्थाने भाजपायाः उपरि मुख्यमन्त्रिणः वाक्प्रहारः,काङ्ग्रेसनेतृभिः दासतायाः श्रृङ्खलाः भग्नाः



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
मध्यप्रदेशस्य महूस्थाने संविधानस्य उद्धाराय आयोजितायां काङ्ग्रेससभायां सोमवासरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः भागं गृहीतवान्। जयभीमः, जयबापू, जय संविधानं शीर्षकान्वितां सभां सम्बोधयन् मुख्यमन्त्री उक्तवान् यत् काङ्ग्रेसनेतृभिः दासतायाः श्रृङ्खलाः भङ्गयित्वा संविधानस्य निर्माणं कृत्वा लोकतन्त्रस्य सुदृढम् आधारं स्थापितम्। बाबासाहेबस्य अम्बेडकरस्य संविधानेन प्रत्येकं भारतीयस्य समानाधिकारस्य सम्मानस्य च कवचः दत्तः। अखिलभारतीयराष्ट्रीयकाङ्ग्रेसस्य अध्यक्षः मल्लिकार्जुनखड़गे, विपक्षनेता राहुलगान्धी, अनेके वरिष्ठनेतारः चेत्येतेषां सभायाम् उपस्थितौ मुख्यमन्त्री उक्तवान् यत् अद्य संविधानं संकटग्रस्तं वर्तते, निर्वाचन-आयोगसदृशाः संवैधानिकसंस्थाः दुर्बलाः भवन्ति। एतादृशे समये राहुलगान्धी संविधानस्य सत्यरक्षकः सेनापतिः च इति रूपेण उद्भूतः अस्ति। भारतजोडोयात्रायाः माध्यमेन देशस्य एकतायाः, अखण्डतायाः, भ्रातृत्वस्य च सन्देशं दातुं सः सहस्राणि किलोमीटर-पर्यन्तं पादचारेण गतः। राज्यकाङ्ग्रेस अध्यक्षा प्रतिभासिंहः अपि सभां सम्बोधितवती। केन्द्रीयगृहमन्त्री अमितशाहेन बाबासाहेबस्य डॉ. भीमराव- अम्बेडकरस्य विरुद्धं प्रदत्तस्य वक्तव्यस्य विरोधे काङ्ग्रेसदलम् अखिले देशे संविधानं रक्षय इति यात्रा करोति।

# हिमाचलप्रदेशस्य नेरचौक-मनाली चतुष्पंक्तिमार्गे यात्रायाः मूल्यं वर्धितम्, टकोलीस्थं शुल्कसंग्रहकेंद्रम् आरब्धम्





**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, मण्डी।**
नेरचौक-मनाली चतुष्पंक्तिमार्गे यात्रायां पर्यटकानां स्थानीयजनानां च व्ययः वर्धिष्यते। टकोली- शुल्क-संग्रह-केन्द्रे वाहनानाम् आकारानुसारं शुल्कं देयं भविष्यति। सोमवासरादारभ्य टकोलीस्थं शुल्कसंग्रहकेन्द्रम् आरब्धम् अस्ति। चतुष्पंक्तिमार्गे गच्छन्तः सर्वे लघु-महद्वाहनानि टकोली समीपे शुल्कसंग्रहकेंन्द्रं शुल्कं समर्पयन्ति। पूर्वतने समायोगे इदानीं एलएमवी श्रेण्याः वाहनानां कृते एकदिशि शुल्कं पञ्चरूप्यकाणि तथा द्विदिशि शुल्कं दशरूप्यकाणि न्यूनानि भविष्यन्ति। एतेन प्रकारेण इदानीं १०५ रूप्यकाणि समर्पयितव्यानि। पूर्वं लघुवाहनानां कृते एकदिशि शुल्कं ११० रूप्यकाणि निश्चितमासीत्। महद्वाहनानां प्रोजेक्टनिर्माणयन्त्राणां च कृते पृथक्कृतं शुल्कं देयम् भविष्यति।

# HP News: राज्यप्रदूषणनियन्त्रणमण्डलस्य अनुमतिं विना उद्योगः संचालितः



हिमसंस्कृतवार्ताः शिमला।
राज्यप्रदूषणनियन्त्रणमण्डलेन काङ्गड़ामण्डलस्य डमटालस्य मोहतली, इत्यत्र स्थितस्य एकस्य उद्योगस्य कृते कारणं दर्शयितुं सूचना प्रेषिता अस्ति। अत्र एकः उद्योगः स्थापितः, परन्तु प्रदूषणनियन्त्रणमण्डलात् अनिवार्यः अनुमतिः न प्राप्ता। तस्मिन् एव काले प्रदूषणनियन्त्रणसम्बद्धानि उपकरणानि अपि न प्रयुक्तानि, यस्मात् कारणात् तस्य माध्यमेन जलप्रदूषणं जातम् इति ज्ञातम्। एतादृश्यां परिस्थितौ जलम् (प्रदूषणनिवारणनियन्त्रण) अधिनियम १९७४ तथा वायु (प्रदूषणनिवारणनियन्त्रण) अधिनियम १९८१ इत्येतयोः अन्तर्गतं कार्यविधिं कर्तुं सूचना दत्ता अस्ति। राज्यप्रदूषणनियन्त्रणमण्डलस्य सदस्यसचिवः अनिलजोशी इत्यनेन अस्मिन् विषये आदेशाः कृताः, सम्बन्धित-उद्योगाय सप्तदिनानां समयः दत्तः अस्ति। अस्मिन् संचालकैः अनिवार्यानुमतिं विना एतादृशः उद्योगः कथं स्थापितः इति व्याख्यातव्यं भविष्यति। कथ्यते यत् अस्य उद्योगस्य संचालकः यस्य नाम मैटिनेयर लिमिटेड इति कथ्यते, सः औपचारिकतां पूर्णं कर्तुं आवेदनपत्रं पूरितवान् परन्तु तस्मिन् उत्थापिताः आक्षेपाः समये समये न निराकृताः। अस्य उद्योगस्य नवीनतमेन अन्वेषणप्रतिवेदनेन ज्ञातं यत् क्षेत्रीयपदाधिकारिणा तस्य विद्युत्संयोजनं छेदयितुम् अनुशंसितम्। एतेन सह संचालकस्य विरुद्धं कार्यविधिः अपि अनुशंसिता अस्ति तदनन्तरं राज्यमण्डलस्य समक्षं प्रकरणम् आगतम्। अस्मिन् विषये प्रदूषणमण्डलस्य सदस्यसचिवेन उद्योगसञ्चालकानां कृते सप्तदिनानां समयः दत्तः अस्ति।

# गुडियायाः माता नूतनजागृत्यर्थं याचनां कृतवती, अस्य प्रकरणस्य उच्चन्यायालये शीघ्रमेव भविष्यति श्रवणम्




हिमसंस्कृतवार्ताः - शिमला। गुडियायाः मातुः पक्षतः हिमाचलप्रदेशस्य उच्चन्यायालये अस्य प्रकरणस्य पुनः अन्वेषणार्थं याचना कृता। अस्य कृते न्यायालये आवेदनपत्रं प्रवेशितम् अस्ति, यस्मिन् शीघ्रमेव प्रकरणस्य श्रवणार्थम् अनुरोधः कृतः। गुडियायाः मातुः पक्षतः हिमाचलप्रदेश उच्चन्यायालये मार्च २०२२ तमे वर्षे याचिका प्रवेशिता, या न्यायालयेन स्वीकृता। अस्यां याचिकायां अन्वेषणसंस्थानां विषये प्रश्नाः उत्थापिताः सन्ति, सम्पूर्णस्य विषयस्य पुनः अन्वेषणं कर्तुम् अनुरोधः अपि कृतः। आरोपाः कृताः यत् एतस्य घटनायाः एकसप्ताहस्य अनन्तरं एसआइटी-सङ्घटनस्य निर्माणं जातम्, ततः १०-१५ दिवसेभ्यः अनन्तरं सीबीआई-संस्थायाः अन्वेषणार्थं प्रतिरूपाणि संगृहीतानि। तावत्पर्यन्तं पीडितस्य शरीरमपि दग्धम् आसीत्। पश्चात् कोटखाई-पुलिस- स्थानकम् अपि दग्धम्, यस्मिन् गुडिया- बलात्कार- हत्या- प्रकरणेन सह सम्बद्धाः सर्वे अभिलेखाः स्थापिताः आसन्। उच्चन्यायालये याचिकाकर्ता द्वारा प्रवेशिता याचिका अवकाशदिनानां समाप्तेः अनन्तरं तत्क्षणमेव श्रवणं भविष्यति।

## समग्रं प्रकरणं किम्?

उल्लेखनीयं यत्, २०१७ तमस्य वर्षस्य जुलाईमासस्य ४ दिनाङ्के शिमला-मण्डलस्य कोटखाईक्षेत्रात् लुप्तायाः १६ वर्षीयायाः बालिकाछात्रायाः शवः कोटखाई-नगरस्य तान्दीवने निर्वस्त्रं प्राप्तम्। प्रकरणस्य अन्वेषणार्थं तत्कालीनस्य शिमला-आईजी जैदी इत्यस्य अध्यक्षतायां विशेषान्वीक्षणदलस्य (एस.आइ.टी.) अभियुक्तेषु एकः नेपालीयुवकः सूरजः कोटखाईपुलिसस्थानके पुलिसनिग्रहे तालाबन्दीमध्ये मृतः। एषः मृत्युप्रकरणः अन्वेषणार्थं सीबीआई-इत्यस्मै समर्पितः। सीबीआई- अनुसन्धानेन ज्ञातं यत् सूरजस्य मृत्युः पुलिस-यातनायाः कारणेन अभवत्। अस्य आधारेण सीबीआई इत्यनेन आईजी जैदी इत्यस्य अन्येषां च नवपुलिसपदाधिकारिणां कर्मचारिणां च विरुद्धं हत्यायाः धारा ३०२, प्रमाणानां नष्टीकरणस्य धारा २०१ इत्यादीनि अनेकाभिः गम्भीरधाराभिः अन्तर्गतं प्रकरणं पञ्जीकृतम् आसीत्। २०१७ तमे वर्षे अयं प्रकरणः शिमलाजिल्लान्यायालयात् चण्डीगढ-सीबीआई-न्यायालये स्थानान्तरितः। तदनन्तरं बहुवारं श्रवणम् अभवत् अधुना न्यायालयेन दण्डः घोषितः।

**हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

## *सामान्यज्ञानम्*

प्रश्नः 1. भारत- रत्न- श्री- अटल- बिहारी- वाजपेयी- इकाना- क्रिकेट- क्रीडाङ्गणम् कुत्र अस्ति?
उत्तरम् : लखनऊ (उत्तर प्रदेशे)।
प्रश्नः 2. 'किरणावलि:' इत्यस्य रचयिता क: अस्ति?
उत्तरम् - 'उदयन:'।
प्रश्नः 3. 'कार्ये कुशल:' इत्यस्य समस्त पदं किम्?
उत्तरम्- कार्यकुशल:। (सप्तमी तत्पुरुष:)
प्रश्नः 4. 'योजकस्तत्र' इत्यस्य सन्धि- विच्छेदं कुरुत-
उत्तरम्- 'योजक: + तत्र'।
प्रश्नः 5. भारतस्य प्रधानमन्त्रिणः पदं किं मन्यते?
उत्तरः भारतस्य प्रधानमन्त्रिणः पदं सर्वोच्च कार्यकारी पदं मन्यते।

# सूरजहत्याप्रकरणे जैदीसहितम् अष्टपुलिसकर्मचारिभ्यः आजीवनकारावासः



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।

हिमाचलप्रदेशे वर्षे २०१७ तमे वर्षे शिमलामण्डलस्य कोटखाईक्षेत्रे बहुचर्चितगुडियाबलात्कारहत्याप्रकरणे गृहीतस्य अभियुक्तस्य सूरजस्य बन्दीगृहत्यायाः प्रकरणे चण्डीगढस्य सीबीआई न्यायालयेन सोमवासरे दोषीपुलिसकर्मचारिणां दण्डविषये निर्णयः घोषितः न्यायालयेन अस्मिन् प्रकरणे दोषी इति ज्ञातस्य पूर्व-आईजी आईपीएस-जहूर-हैदर-जैदी-सहितम् अष्टानां पुलिस-अधिकारिणां, कर्मचारिणां च आजीवनकारावासस्य दण्डः दत्तः अस्ति। सर्वेषु अपराधिषु एकलक्षरूप्यकाणां दण्डः अपि कृतः अस्ति। ततः पूर्वं सोमवासरे प्रातःकाले सीबीआई न्यायालयेन दोषीणां अन्तिमायाः प्रार्थनायाः श्रवणं कृतम्। सम्भवतः हिमाचलप्रदेशस्य इतिहासे प्रथमवारं यदा प्रकरणस्य अन्वेषणं कुर्वन् विशेषनिरीक्षणदलं (एसआइटी) आजीवनकारावासस्य दण्डं प्राप्नोति। 18 जनवरी दिनाङ्के सीबीआई न्यायालयेन जैदी इत्यस्य साक्षिणः वक्तव्यस्य साक्ष्यस्य च आधारेण दोषी इति कृत्वा तत्कालीनः डीएसपी मनोज जोशी, पुलिस उपनिरीक्षकः राजिन्दरसिंहः, एएसआई दीपचन्दशर्मा, मानकप्रमुखः हवलदारः मोहनलालः, सूरतसिंहः, मुख्यारक्षी रफी मोहम्मदः च तथा हवलदार रणजीत सटेटा बुरैलकारागारे निरुद्धाः आसन्। न्यायालयेन सर्वेषाम् अभियुक्तानां कृते IPC Act १२०-B इत्यस्य अन्तर्गतं आजीवनकारावासः, २० सहस्ररूप्यकदण्डः, ३०२ इत्यस्य अन्तर्गतं आजीवनकारावासः, २० सहस्ररूप्यकदण्डः च, ३३० इत्यत्र ३ वर्षाणां कारावासः १० सहस्ररूप्यकदण्डस्य च दण्डः दत्तः, ३४८ इत्यस्यान्तर्गतम् एकवर्षं ५ सहस्ररूप्यकदण्डस्य च दण्डः दत्तः अस्ति, १२०-बी, १९५ इत्यस्य अन्तर्गतं आजीवनकारावासः, २०,००० रूप्यकाणां दण्डः, १९६ इत्यत्र त्रीणि वर्षाणि १०,००० रूप्यकाणि च, २१८ इत्यत्र एकवर्षं, १० सहस्ररुप्यकाणि, २०१ इत्यत्र च एकवर्षं दण्डं ५,००० रूप्यकाणां दण्डः च दण्डितः अभवत्। ध्यातव्यं सूरजस्य हत्या गुडिया हत्याकाण्डस्य १४ दिवसाभ्यन्तरे कोटखाई- पुलिस- स्थानस्य बन्दीगृहे अभवत्। पुलिसैः अन्यस्य अभियुक्तस्य विरुद्धं हत्यायाः आरोपः कृतः आसीत्। तेन क्रुद्धाः जनाः पुलिस-स्थानसहिताः अनेकानि वाहनानि दग्धवन्तः।

# ।। श्रीरामायणकथा ।।



### उत्तरकाण्डम्!(सप्तपञ्चाशत्तमः सर्गः)नैमिषारण्यं प्रति रामस्य गमनम्।(द्वितीयः खण्डः)

भरताग्रजः रामः तत् सर्वम् अखिलेन प्रस्थाप्य लक्षणसम्पन्नं कृष्णसारम् अश्वम् अमुञ्चत्। ततः ऋत्विग्भिः सार्धं लक्ष्मणं तस्मिन् अश्वे विनियुज्य रामः सैन्येन सह नैमिषम् अगच्छत्। तत्र गत्वा सः रामचन्द्रः यज्ञवाटं दृष्ट्वा अत्यन्तं हर्षम् अलभत। तत्र यदा रामः उपस्थितः अभवत् तदा तत्र स्थिताः राजानः तत्कृते उपहारान् आनयन्, रामः अपि तान् प्रत्यपूजयत्। सशत्रुघ्नः भरतः तेषां राज्ञां सेवायां नियुक्तः अभवत्। ससुग्रीवाः वानराः सर्वे ब्राह्मणानां परिवेषणकार्ये नियुक्ताः अभवन्। राक्षसैः सह विभीषणः किङ्करः इव ऋषीणामुग्रतपसां सेवायां नियुक्तः अभवत्। रामस्य तस्मिन् यज्ञे सर्वे राजानः राजपुरुषाश्च उपस्थिताः आसन्। एवं सुविहितः अश्वमेधयज्ञः अवर्तत, लक्ष्मणेन च सुगुप्ता हयचर्या प्रवर्तते स्म। महात्मनः रामस्य तस्मिन् यज्ञे याचकानां मुखे देहि देहि इत्यस्मात् ऋते तत्र अन्यः शब्दः न श्रूयते स्म। अर्थिनां मुखात् यावत् वाक्यं न निःसृतं वानरैः रक्षोभिः च विविधाः गुडाः खाण्डवाश्च तेभ्यः दीयन्ते स्म। राज्ञः रामस्य तस्मिन् हृष्टपुष्टजनावृते यज्ञे ये महात्मानः मुनयश्चिरजीविनः आसन् ते तादृशं दानौघसमलङ्कृतं यज्ञं तदा नास्मरन्। तत्र यः सुवर्णेन कृत्यवान् सः सुवर्णं लभते स्म, यः वित्तार्थी सः वित्तं लभते स्म, यः च रत्नार्थी सः रत्नं लभते स्म। तत्र हिरण्यस्य सुवर्णस्य रत्नस्य वाससां च अनिशं दानं समुपदृश्यते स्म। दीयमानानाम् ईदृशः राशिः इन्द्रस्य, वरुणस्य यमस्य सोमस्य वा यज्ञे न दृष्टपूर्वः इति ते तपोधनाः परस्परं वदन्ति स्म। राजसिंहस्य ईदृशः सर्वगुणान्वितः यज्ञः आसीत् यत्र संवत्सरं यावत् वानराः राक्षसाश्च पूर्णहस्ताः याचकेभ्यः वासोधनानि ददति स्म तथापि तानि धनानि साग्रं वर्धन्ते स्म न च हीयन्ते स्म। -प्रदीपः!

# दिल्ली-निर्वाचनात् पूर्वम् जनानां कृते अनेकान् प्रत्यादेशान् घोषयित्वा दलस्य घोषणापत्रं प्रकाशितवान् केजरीवालः



हिमसंस्कृतवार्ताः। नवदेहली-आम आदमी पार्टी दलस्य संयोजकः अरविन्द केजरीवालः दिल्ली-निर्वाचनात् पूर्वम् राष्ट्रिय- राजधान्याः जनानां कृते अनेकान् प्रत्यादेशान् घोषयित्वा दलस्य घोषणापत्रं प्रकाशितवान्। नवदेहली-नगरे प्रसारमाध्यमान् सम्बोधयन्, केजरीवालः आश्वासितवान् यत्, यदि सः निर्वाचितः भविष्यति, तर्हि अग्रिमेषु पञ्चवर्षेषु पञ्चादश प्रत्यादेशान् पूरयिष्यति इति। सः अवदत् यत् एतेषु पञ्चादश प्रत्यादेशेषु वृत्यवसरः, चिकित्सा-उपचारार्थं सञ्जीवनी योजना, प्रत्येकस्यै महिलायै प्रतिमासं एकविंशतिशत रूप्यकाणां आर्थिकलाभः, पुरातनजल-देयानां मुक्तिश्च अन्तर्भूताः सन्ति । भाजपा अथ काङ्ग्रेस्-दले दिल्ली-नगरस्य जनानां कृते मिथ्या-प्रतिज्ञां कुरूतः इति सः आरोपितवान्। पत्रकारसम्मेलने भाजपा-पक्षस्य वरिष्ठः नेता सम्बित् पात्रा अमृत्सर्-पञ्जाब् इत्यत्र डा. भीमराव् अम्बेड्कर् इत्यस्य प्रतिमा भङ्गिता इति आरोपम् अकरोत्। सः एतत् कृत्यं लज्जाजनकम् इति अमन्यत् । एषा घटना राज्यस्य वर्तमान-विधि-व्यवस्थायाः स्थितिं प्रतिबिम्बयति इति आरोपयन् श्री पात्रा, आम् आदमी दलस्य संयोजक अरविन्द केजरीवाल इत्यमुं अपि क्षमायाचनार्थम् अपि अकथयत्

## वक्फविधेयकस्य संशोधनाय जेपीसी संस्थायाः स्वीकृतिः

वक्फविधेयकस्य परिवर्तनं सोमवासरे संसदस्य संयुक्तसमित्या (जेपीसी) अनुमोदितम्। जेपीसी अध्यक्षः जगदम्बिका पालः अवदत् यत् अस्यां अन्तिमायां सभायां सर्वेषां ४४ संशोधनानाम् चर्चा कृता। एतेषु एनडीए-सांसदानां १४ परामर्शाः अनुमोदिताः सन्ति । विपक्षस्य सदस्याः अपि केचन प्रस्तावाः प्रस्तुतवन्तः, परन्तु मतदानकाले ते अङ्गीकृताः । वक्फ (संशोधन) विधेयकस्य संयुक्तसंसदीयसमितिः बजटसत्रे स्वप्रतिवेदनं प्रस्तुतं करिष्यति। संसदस्य शिशिरसत्रे समितियाः कार्यकालस्य विस्तारः अभवत् ।

## प्रधानमन्त्री नरेन्द्रमोदी-डोनाल्ड ट्रम्पयोः मध्ये दूरभाषेण वार्तालापः



प्रधानमन्त्री नरेन्द्रमोदी-डोनाल्ड ट्रम्पयोः मध्ये दूरभाषेण वार्तालापः अभवत् । ट्रम्पस्य राष्ट्रपतित्वस्य अनन्तरं द्वयोः मध्ये एतत् प्रथमं वार्तालापम् अस्ति। २० जनवरी दिनाङ्के शपथग्रहणं कृत्वा डोनाल्ड ट्रम्पः द्वितीयवारं अमेरिकादेशस्य राष्ट्रपतिः अभवत् । अस्मिन् प्रथमे वार्तालापे प्रधानमन्त्री मोदी द्वितीयवारं सत्तां स्वीकृत्य ट्रम्पं अभिनन्दितवान्। सूत्रानुसारं दूरभाषेण सम्भाषणे भारत-अमेरिका-देशयोः द्विपक्षीयसम्बन्धविषये चर्चां कृतवन्तौ । इन्स्टाग्रामे एकस्मिन् पोस्ट् मध्ये पीएम मोदी स्वमित्रेण राष्ट्रपतिना डोनाल्ड ट्रम्पेन सह वार्तालापं कृत्वा प्रसन्नः इति उक्तवान्। ऐतिहासिकद्वितीयकार्यकालस्य अभिनन्दनं कृतवान्। वयं परस्परं लाभप्रदं विश्वसनीयं च सहयोगं प्रति प्रतिबद्धाः स्मः। सः अवदत् यत् वयं अस्माकं जनानां हिताय वैश्विकशान्तिसमृद्धयसुरक्षा च मिलित्वा कार्यं करिष्यामः।

## "लौकिकन्यायकोशः" "सुभगा-भिक्षुन्यायः"

सुभगा इति भिक्षुः इति च पदद्वयम्। एतत् भवति चेदपि तयोः परस्परं विरोधः एव न तु अन्वयः एकदा एका सुभगा एकः भिक्षुः च एकदा एव एकस्य गृहं गत्वा आश्रय प्रार्थितवन्तौ। तदा तेन द्वयोः एकस्मै आश्रयः देयः इति मत्वा सुभगायै आश्रयः दत्तः एवं स्मृत्यादिशास्त्राणि श्रुतिसहितानि चेदपि श्रुत्याधारितत्वात् प्रमाणानि भवन्ति। न केवलं मुनिप्रोक्तत्वात्।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

## हास्यकणिका

### ।।पत्न्या सह तर्क-वितर्कः मास्तु।।



हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल
प्रेरणास्त्रोतः- महाभागः महेन्द्रमिश्रमहोदयः

आवश्यकः नास्ति, सर्वाः भार्याः युद्धं कुर्वन्ति। काञ्चन भार्याः शाकेषु अधिकं लवणं, मरीचिकां च योजयित्वा अपि प्रतिशोधं कुर्वन्ति।